to the School of S'aṁkarācārya and were ardent followers of that system. Many wrote standard works on both the systems too. By continuing the performance of the Vedic rituals and at the same time by faithfully following the *Vedānta* system, it cannot be said that they were rebels against the founder of the *Advaita* School; nor can it be said that they had no definite convictions of their own. The only conclusion is that the *Advaita Vedānta* and the *Mīmāṁsā* developed side by side as companion systems, interpreting the *Vedas*.

I had difficulties in writing this Introduction, since I am in distance, without any book for reference. I had to refer matters to Madras occasionally. I take this opportunity to record my obligation for help to Dr. K. Kunjunni Raja who was a former student of mine and who is now Senior Lecturer in the Sanskrit Department of the Madras University. As a student he was doing Hony. work for the Adyar Library, which he continues now when he is in Madras as a member of the University. I am also indebted to Pandit V. Krishnamacharya the author of this Catalogue for valuable assistance on various points.

C. KUNHAN RAJA

MĪMĀṀSĀ AND ADVAITA-VEDĀNTA

I. MĪMĀṀSĀ

1 10. E. 5.

मीमांसासूत्राणि—जैमिनिकृतानि

Paper. 41 Foll. 12×4 inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

A collection of the original sūtras of the Mīmāṁsā philosophy, one of the six well-known Dars'anas. The Sūtras formulate the rules of interpretation of the Vedic texts relating to the Karmakāṇḍa. But the rules laid down here are freely applied for the Jnānakāṇḍa also. The title Mīmāṁsā literally meaning 'an investigation' is common to both the parts of the philosophy namely the Karmakāṇḍa and the Jñānakāṇḍa of the Vedic text. Hence this branch of the Mīmāṁsā is generally called Karmamīṁāmsā as distinguished from the Brahmamīmāṁsā. Because the Karmakāṇḍa forms the former part of the Vedic text, the relevant Mīmāṁsā also is called Pūrvamīmāṁsā as distinguished from the Uttaramīmāṁsā relating to the latter part. But in practical usage these two parts of the Mīmāṁsā are distinctly designated with two different titles—Mīmāṁsā and Vedānta respectively.

The author Jaimini is traditionally said to have been the disciple of Vyāsa (the famous author of the Mahābhārata) who is widely known as identical with Bādarāyaṇa, the reputed author of the Brahmasūtras. However some modern critics opine that Vyāsa and Bādarāyaṇa were two distinct authors. Jaimini mentions herein the following names of authors: Bādari, Aitis'āyana, Kārṣṇājini, Ātreya, Ālekhna, Ās'marathya, Lābukāyana, and Kāmukāyana. Jaimini is also believed to have written four more adhyāyas called the Devatākāṇḍa or the Saṁkarṣakāṇḍa according to the Vṛttikāra-Bodhāyana. But according to the Tattvaratnākara of Parās'arabhaṭṭa, the Devatākāṇḍa was written by Kās'akṛtsna. This discrepancy has been ably answered by Sri Vedāntades'ika in his Adhikaraṇasārāvali. Though the entire text of the Devatākāṇḍa is not available now, some passages from it are found quoted in later works. Devasvāmin and Bhāskararāya have commented upon certain Saṁkarṣakāṇḍa; but it seems different from the Devatākāṇḍa referred to above.

The work is diveded into 12 adhyāyas each containing four pādas except 3, 6 and 10 which contain 8 pādas each. Thus the total number of pādas in the whole work comes to 60. The total number of sūtras as mentioned in this MS. is 2550, while according to the printed editions 2744. The difference may be accounted for the method of splitting the sūtras. The modern scholars fix the date of the work before 200 B.C.

The MS. contains the adhyāyas 1 to 12 complete.

Beginning :

अथातो धर्मजिज्ञासा । चोदनालक्षणोऽर्थो धर्मः । तस्य निमित्तपरीष्टिः ।

End :

चतुर्धाकरणे च निर्देशात् । अन्वाहार्ये च दर्शनात् ।

Colophon :

इति जैमिनिसूत्रे द्वादशाध्यायस्य चतुर्थः पादः । समाप्तश्च द्वादशोऽध्यायः ।

सूत्राणां तु सहस्रे द्वे तथा पञ्च शतानि च ।
पञ्चाशच्च व्यासशिष्यो जैमिनिः कृतवान् स्वयम् ॥

The date of the MS. is mentioned as S'aka 1766=1844 A.D.

शके १७६६ श्रावणकृष्णद्वादशीभौमे इदं पुस्तकं समाप्तम् ।

2 28. H. 25.

मीमांसासूत्राणि

Palm-leaf. 9 Foll. 18¼ × 2 inches. 10 lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the 2nd pāda of the 12th adhyāya.

Reads the following colophon at the end.

इति जैमिनिविरचिते मीमांसासूत्रे द्वादशस्याध्यायस्य द्वितीयः पादः ।

Fol. 9*b* contains a Cāṭupadyamu in Telugu language.

3 22. H. 65.

मीमांसासूत्रभाष्यम् —शबरस्वामिकृतम्

Palm-leaf. 266 Foll. 18 × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Folios are numbered 1 to 268 ; but Foll. 65 and 66 are missing.

This is the famous commentary on Jaimini's Pūrvamīmāṁsāsūtras by Ācārya S'abarasvāmin. This bhāṣya is the common basis of the later works on Mīmāṁsā relating to the schools of Kumārila and Prabhākara. Regarding the date of S'abarasvāmin some scholars assign him in 57 B.C. while others in 200 A.D. S'abara mentions Pāṇini, Kātyāyana, Yāska, Piṅgala, Bodhāyana, Āpastamba and Manu. He also quotes Upavarṣa with the reverential title ' Bhagavān ' as the Vṛttikāra on the Pūrvamīmāṁsāsūtras. Upavarṣa is known to have written Vṛtti on the Brahmasūtras also and held to be identical with Bodhāyana the author of the Bodhāyanavṛtti thereon.

The codex contains the adhyayās 1 to 6 with some lacunae.

Beginning :

(अथातो धर्मजिज्ञासा । लोके येष्वर्थेषु प्रसिद्धानि पदानि) तानि सति संभवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम् । नाध्याहारादिभिरेषां परिकल्पनीयोऽर्थः परिभाषितव्यो वा । एवं वेदवाक्यान्येवैभिर्व्याख्यायन्ते ।

Ends :

प्रायेणापि हि नियमः क्रियते । यथा अग्न्यप्राये लिखितं दृष्ट्वा अग्न्योऽयमिति बुद्धिर्भवति । तस्मात् छाग एवोपादातव्य इति । कृत्वाचिन्तायां प्रयोजनं न वक्तव्यम् ।

Colophon :

इति शबरस्वामिकृतौ मीमांसाभाष्ये षष्ठस्याध्यायस्याष्टमः पादः । समाप्तश्चाध्यायः ।

4 20. L. 20.

मीमांसासूत्रभाष्यम्—शबरस्वामिकृतम्

Palm-leaf. 130 Foll. 17 × 1¼ inches 9 lines in a page. Telugu script. Old, Injured. Clear writing.

Foll. 59 and 92 are half-broken.

Begins in the 4th pāda of the 3rd adhyāya and breaks off in the middle of the 2nd pāda of the 9th adhyāya.

Beginning :

निवीतमिति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात् । दर्शपूर्णमासयोराम्नातम्—"निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत्कुरुते" इति ।

End :

वाक्यानां तु विभक्तत्वात् प्रतिशब्दं समाप्तिः स्यात् संस्कारस्य तदर्थत्वात् । तुशब्दः पक्षं व्यावर्तयति । वाक्यानि विभक्तानि त्रीण्येतानि यास्तिस्र ऋचस्तत्रैका ऋक् कृत्स्नेन पदग्रामेण कांचित् स्तुतिमभिनिर्वर्तयति । न ऋगन्तरेण सह कंचिदर्थं.

5 20. M. 33.

मीमांसासूत्रभाष्यम्—शबरस्वामिकृतम्

Palm-leaf. 7 Foll. 17½ × 1½ inches 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 4th pāda only of the 1st adhyāya.

6 20. N. 4.

मीमांसाश्लोकवार्त्तिकम्—कुमारिलभट्टकृतम्

Palm leaf. 122 Foll. 13½ × 1½ inches. 7 lines in a page. Malayālam script. Old. Much injured. Good writing. Wooden boards are added to both sides.

This is a metrical exposition of S'abarasvāmin's Mīmāṁsāsūtrabhāṣya by Kumārilabhaṭṭa. He has written commentary on the whole of the S'ābarabhāṣya. This work forms the first part of the commentary and covers the Tarkapāda only *i.e.*, the first pāda of the first adhyāya. The second part which is called Tantravārttīka covers the portion from the second pāda of the first adhyāya to the end of the third adhyāya. The third part which is called Ṭupṭīkā covers the adhyāyas four to twelve. According to the Sarvadars'anakaumudī of Mādhavasarasvatī Kumārila was the author of two more works

namely Bṛhaṭṭikā and Madhyamaṭīkā both being Commentaries on the S'ābarabhāṣya. Copies of these two works are not available now; yet quotations from them are tracable in later Mīmāṁsā works. Kumārila vehemently refutes the tenets of Bauddhas and Sphoṭavādins in the following chapters: Nirālambanavāda, S'ūnyavāda, Apohavāda, Ātmavāda, and Sphoṭavāda. Kumārila is said to have been the preceptor of Maṇḍanamis'ra the famous author of the Brahmasiddhi etc. (700 A.D.). Therefore the author may be assigned in the 7th century A.D. He is popularly known as Vārttikakāra in the Mīmāṁsaka group.

Wants the beginning in the 1st sūtra, otherwise complete.

Beginning:

स्थिते वेदप्रमाणत्वे पुनर्वाक्यार्थनिर्णये ।
मतिर्बहुविदां पुंसां संशयान्नोपजायते ॥
केचिदाहुरसावर्थः केचिन्नासावयं त्विति ।
तन्निर्णयार्थमप्येतत्परं शास्त्रं प्रणीयते ॥
प्रथमसूत्रं समाप्तम् ।

End:

इति प्रमाणत्वमिदं प्रसिद्धं
युक्त्येह धर्मे प्रति चोदनायाः ।
अतः परं तु प्रविभज्य वेदं
त्रेधा ततो वक्ष्यति तस्य योऽर्थः ॥

Colophon:

इति भट्टकुमारिलाचार्यकृतौ मीमांसाश्लोकवार्त्तिके प्रथमस्याध्यायस्य प्रथमः पादः ।

The scribe adds:

अक्षरं यत्परिभ्रष्टं + कस्य नास्ति व्यतिक्रमः ।
ब्रह्मदत्तेन लिखितमिदं पुस्तकम् ।

7 20. N. 2.

मीमांसाश्लोकवार्त्तिकव्याख्या तात्पर्यटीका—उम्बेकभट्टकृता

Palm-leaf. 152 Foll. $21\frac{1}{2} \times 2\frac{1}{4}$ inches. 12 lines in a page. Malayālam script. Old. Injured. Good writing. Wooden boards are added to both sides.

This is a commentary on the Mīmāṁsās'lokavārttika of Kumārilabhaṭṭa. The commentary is called Tātparyaṭīkā. The commentator Umbekabhaṭṭa is said to have been the direct disciple of Kumārilabhaṭṭa and called with other names as Vis'varūpa and Bhavabhūti. According to Vidyāraṇya's S'aṁkaradigvijaya, Umbeka is identical with the famous Maṇḍanāmisra (the author of Brahmasiddhi etc.) and with Vis'varūpa (the author of the Bālakrīḍā, a commentary on the Yājñavalkyasmṛti). Thus according to Vidyāraṇya Maṇḍana, Vis'varūpa, Umbeka and S'ures'vara are all identical. But the identity of Maṇḍana with Sures'vara was refuted by Prof. M. Hiriyaṇṇa of Mysore and Prof. S. Kuppuswami Sastri of Madras. (*Vide* journal of the Royal Asiatic Society of Great Britain and Ireland 1923 and the Introduction to the Brahmasiddhi.)

The commentary has been printed and published in the Madras University Sanskrit Series No. 13 in the year 1940 and the edition was based on this single MS. As the first leaf of the MS. is very much injured the beginning is given from the printed edition:

Contains the following chapters : Pratyakṣa, Vṛttigrantha, S'ūnyavāda, Anumāna, S'abda, Upamāna, Arthāpatti, Abhāva, Citrākṣepa, and Sphoṭavāda.

Beginning :

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः ।
उत्पत्स्यते मम तु कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥

ग्रन्थारम्भेऽभिमतदेवतां प्रस्तौति वार्त्तिककारः—विशुद्धेति । तस्य च कर्तव्यतायां शिष्टाचारः प्रमाणम् । प्रयोजनं च विघ्नोपशमः, तस्यैव ग्रन्थारम्भेऽपेक्षितत्वात् । न तु स्वर्गः, अनपेक्षितत्वात् आरम्भसंयोगविरोधाच्च । आत्मन्यगौरवपरिहारार्थमुपासितगुरुतामनेनाह—अभिवन्द्येति । अनेन मात्रादिगुरुसंप्रत्यये सति विद्यागुरुसंप्रत्ययार्थमाह— शिष्यधीत्यादि । श्लोकवार्त्तिकमिति प्रारिप्सितग्रन्थसंज्ञा । इदानीं वार्त्तिकप्रतिष्ठासिद्ध्यर्थमनुनयावर्जनीयहृदयान् विदुषोऽभ्यर्थयितुमाह—तदिति । सा चेयं प्रार्थना, न त्वाज्ञेत्यर्थान्तरन्यासेन दर्शयन्नाह—सन्त इति ।

Colophon of the 1st Sūtra :

इति भट्टोम्बेकविरचितायां तात्पर्यटीकायां प्रथमं सूत्रं समाप्तम् ।

End :

वर्णचयातिरिक्तस्य विधिमुखेन कार्यमुखेन वानुपलभ्यमानत्वेन संबन्धग्रहणाभावाद्वाक्यस्फोटस्यासत्यत्वे संबन्धस्यासत्यत्वात् वर्णचयात्मन्येव संबन्धिनि तस्योपलभ्यमानत्वेन च संबन्धस्य सद्भावः सत्यत्वं च सिध्यति । तदाह—वाक्यावयवाश्रयाणीत्यादि । सत्यानि कर्तुं कृत एष यत्नः—स्फोटात्मकसंबन्धिनः प्रतिषेधेन वर्णात्मकसंबन्ध्यवधारणरूपः । तदुक्तम्—आधारात्मनि विज्ञाते सुखमाधेयबोधनमिति ।

Colophon :

इति भट्टोम्बेकरचितायां तात्पर्यटीकायां स्फोटाख्यं वादस्थानकं समाप्तम् ।

8 20. N. 2.

मीमांसाश्लोकवार्त्तिकव्याख्या शर्करिका—जयमिश्रकृता

Palm-leaf. 39 Foll. 21½ × 2½ inches. 12 lines in a page. Malayālam script. Old. Injured. Good writing. Wooden boards are added to both sides.

This is another commentary on Kumārila's S'lokavārttika by Jayamis'ra who calls himself as Bhaṭṭaputra. This work is found in the last part of the same MS. of the Tātparyaṭīkā described in the last number and runs on in continuation of the Tātparyaṭīkā. The commentary is called S'arkarikā. In the Syādvādaratnākara of S'rīdeva there are references to this and Umbeka's commentaries. As S'rīdeva is believed to have lived about the 11th century A.D. these authors Jayamis'ra and Umbeka must belong to the date earlier than the 11th century A.D. Besides this, no evidence is available to say much definitely about this author. The commentary has been published in the Madras University Sanskrit Series No. 17 in the year 1946.

Contains the portion dealing with the following subjects. Ākṛtivāda, Apohavāda, Vanavāda and Sambandhākṣepaparihāravāda (incomplete).

Beginning :

अत्र भाष्यम्—अथ गौरित्यस्य शब्दस्य कोऽर्थः इति । तत्रास्य वाच्यनिरूपणस्य प्रकृतसंबन्धौत्पत्तिकत्वसिद्धान्तोपयोगितां दर्शयन्नाह—

आकृतिव्यतिरिक्तेऽर्थे संबन्धो नित्यतास्य च ।
न सिध्येतामिति ज्ञात्वा तद्वाच्यत्वमिहोच्यमे ॥

इति । क्षणिकाभिरनन्ताभिश्च व्यक्तिभिः संबन्ध एव न तावत्कर्तुं शक्यः । क्षणिकाभिस्तु शक्यो नित्यो न प्राप्नोति । अतोऽस्ति प्रकृतोपयोगित्वमित्यर्थः ।

Colophon of the Ākrtivāda :

इति भट्टपुत्रजयमिश्रविरचितायां श्लोकवार्त्तिकव्याख्यायां शर्करिकायामाकृतिग्रन्थे प्रथमः परिच्छेदः ।

End :

न ह्यन्यो दर्शनस्यास्ति संबन्धाद्धेतुरत्र हि ।

इति । अतश्च संबन्धोऽपीदानीं सद्रूप एवावाप्तवृद्धव्यवहारसामग्रीकेण चक्षुष्मतेव रूपं गृह्यमाणोऽर्थप्रतिपादनादिकं स्वार्थं साधयति नानवाप्तवृद्धव्यवहारेणान्धेनेव रूपमगृह्यमाण इति योजयति—

एवमेवेन्द्रियैस्तुल्यं व्यवहारोपलम्भनम् ।

9 40. B. 24.

मीमांसाश्लोकवार्त्तिकटीका काशिका—सुचरितमिश्रकृता

Paper. 99 Foll. $11\frac{1}{2} \times 3\frac{7}{8}$ inches 8 lines in a page. Devanāgarī script. Old. Good. Good writing.

This also is a commentary on Kumārila's S'lokavārttika by Upādhyāya. Sucaritamis'ra He has been mentioned by Srī Vedāntades'ika (1300 A.D.) in his Ses'varamīmāṁsā. He may be assigned in the period between 1000—1100 A.D.

Contains the first two sūtras of the first pāda of the first adhyāya.

Beginning :

वार्त्तिकारम्भे शिष्टाचारमनुविदधानो मङ्गलं तावत् करोति—विशुद्धेति । दृष्टा हि शिष्टानां प्रवृत्तिः सर्वकार्येषु मङ्गलपूर्विका । मङ्गलं देवतास्तुतिनमस्कारादि ।

End :

यदेतदनर्थानां हिंसादीनां वर्जनमिदं धर्मानुवादेन प्रमाणविधानवचनव्यक्तेरेवार्थसामर्थ्यकारितं फलं भाष्यकारेण कथ्यत इत्यर्थः ।

Colophon :

इत्युपाध्यायसुचरितमिश्रकृतायां काशिकाटीकायां द्वितीयं सूत्रम् ।

The first and last pages give the total number of Granthas of this MS. as 3400.

10 38. G. 5.

मीमांसाश्लोकवार्त्तिकटीका काशिका—सुचरितमिश्रकृता

Paper. 1845 Foll, $8\frac{1}{4} \times 6\frac{1}{8}$ inches 14 lines in to page. Devanāgariī script. New. Good. Good writing.

Contains up to the end of the S'abdādhikaraṇa.

This is a transcript made from the original MS. available in the Govt. Oriental MSS. Library, Madras.

End :

अधिकरणार्थमुपसंहरति—तस्मादिति । यतोऽस्य हेतुत्वेन संभावितस्य वायोर्भागा न निर्धार्यन्ते, अतो

नायं वायवीयः सन् प्रादेशिकः। पूर्वोक्तेन तन्न्यायेन सर्वत्र साक्षाद्भवन्नयमाकाशादिवद्विभुरेव। अतस्तद्वदेव नित्य इति सिद्धमिति।

Colophon :

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायां शब्दाधिकरणं समाप्तम्।

The scribe of the original MS :

ब्रह्मदत्तेन लिखितम्।

11 20. M. 33.

तन्त्रवार्त्तिकम् —कुमारिलभट्टकृतम्

Palm-leaf. Foll. 16-17½ × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This is an exposition of the Mīmāṁsā-sūtrabhāṣya of S'abarasvāmin in continuation of the S'lokavārttika described in previous numbers. The S'lokavārttika deals with the 1st pāda (Tarkapāda) of the S'abarabhāṣya while this work deals with the portion from the 2nd pāda of the 1st adhyaya up to the end of the 3rd adhyāya. The third part called Ṭupṭīkā deals with the adhyāyas 4 to 12 of the S'ābarabhāṣya. This work has three commentaries called Nyāyasudhā *alias* Rāṇaka by Somes'vara, Ajitā *alias* Tantraṭikānibandhana by Paritoṣamis'ra and Nyāyapārayaṇa by Gaṅgādhara.

Contains the 4th pāda of the 1st adhyāya.

Beginning :

उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात्।

एवं स्मृतिसहितस्य वेदस्य प्रामाण्ये सिद्धेऽधुना वाक्यार्थव्याख्यानावसरे सत्यपरिसमाप्त्यैव प्रमाणलक्षणं केन संबन्धेन नामधेयचिन्तायाः प्रस्तावः क्रियते। केचित्तावदाहुः—किमुद्भिदादयो गुणस्य प्रमाणमुत क्रियाणामेव नामधेयत्वेनेति। तदयुक्तम्। एवं सति हि समस्तमेव शास्त्रं प्रमाणलक्षणादभिन्नं स्यात्। सर्वत्र हि एतद्विचार्यते। किमिदं वाक्यमस्यार्थस्य प्रमाणमुतान्यस्येति।

End :

तस्माद्यावदेव लब्धात्मको विधिस्तावद्यत्कल्पते तद्वैदिकम्। सिद्धे तु तत्कल्पनं पौरुषेयत्वादप्रमाणम्, सामर्थ्याधीनत्वाद्वाक्यशेषसिद्धेः। आह च—

यथैव पाठः प्रतिपत्त्युपाय-
स्तथैव सामर्थ्यमपि श्रुतीनाम्।
तेनैव चैता न समामनन्ति
सहस्रभागं तु समामनेयुः॥
इति कृतबहुमार्गं मन्त्रविध्यर्थवादैः
स्मृतिपरिखमुदारं वेदशालोपगूढम्।
अनभिभवसमर्थं धर्मदुर्गं प्रविश्य
प्रविभजति समर्थामर्थचिन्तामिदानीम्॥

Colophon :

इति गुरुवाक्य + प्रथमस्याध्यायस्य चतुर्थः पादः

12 38. D. 7.

तन्त्रवार्त्तिकटीका अजिता— परितोषमिश्रकृता

Paper. 437 Foll. 8 × 6 inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing. Bound in 2 Volumes.

A commentary on Kumārila's Tantravārttika by Paritoṣamis'ra. The commen-

नायं वायवीयः सन् प्रादेशिकः । पूर्वोक्तेन तन्न्यायेन सर्वत्र साक्षाद्ववन्नयमाकाशादिवद्विभुरेव । अतस्तद्वदेव नित्य इति सिद्धमिति ।

Colophon :

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायां शब्दाधिकरणं समाप्तम् ।

The scribe of the original MS :

ब्रह्मदत्तेन लिखितम् ।

11 20. M. 33.

तन्त्रवार्त्तिकम् —कुमारिलभट्टकृतम्

Palm-leaf. Foll. 16-17½ × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This is an exposition of the Mīmāṁsā-sūtrabhāṣya of S'abarasvāmin in continuation of the S'lokavārttika described in previous numbers. The S'lokavārttika deals with the 1st pāda (Tarkapāda) of the S'abarabhāṣya while this work deals with the portion from the 2nd pāda of the 1st adhyaya up to the end of the 3rd adhyāya. The third part called Ṭupṭīkā deals with the adhyāyas 4 to 12 of the S'ābarabhāṣya. This work has three commentaries called Nyāyasudhā *alias* Rāṇaka by Somes'vara, Ajitā *alias* Tantraṭikānibandhana by Paritoṣamis'ra and Nyāyapārayaṇa by Gaṅgādhara.

Contains the 4th pāda of the 1st adhyāya.

Beginning :

उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् ।

एवं स्मृतिसहितस्य वेदस्य प्रामाण्ये सिद्धेऽधुना वाक्यार्थव्याख्यानावसरे सत्यपरिसमाप्त्यैव प्रमाणलक्षणं केन संबन्धेन नामधेयचिन्तायाः प्रस्तावः क्रियते। केचित्तावदाहुः—किमुद्भिदादयो गुणस्य प्रमाणमुत क्रियाणामेव नामधेयत्वेनेति। तदयुक्तम्। एवं सति हि समस्तमेव शास्त्रं प्रमाणलक्षणादभिन्नं स्यात्। सर्वत्र हि एतद्विचार्यते। किमिदं वाक्यमस्यार्थस्य प्रमाणमुतान्यस्येति।

End :

तस्माद्यावदेव लब्धात्मको विधिस्तावद्यत्कल्पते तद्वैदिकम्। सिद्धे तु तत्कल्पनं पौरुषेयत्वादप्रमाणम्, सामर्थ्याधीनत्वाद्वाक्यशेषसिद्धेः । आह च—

यथैव पाठः प्रतिपत्त्युपाय-
स्तथैव सामर्थ्यमपि श्रुतीनाम् ।
तेनैव चैता न समामनन्ति
सहस्रभागं तु समामनेयुः ॥
इति कृतबहुमार्गे मन्त्रविध्यर्थवादैः
स्मृतिपरिखमुदारं वेदशालोपगूढम् ।
अनभिभवसमर्थं धर्मदुर्गं प्रविश्य
प्रविभजति समर्थामर्थचिन्तामिदानीम् ॥

Colophon :

इति गुरुवाक्य + प्रथमस्याध्यायस्य चतुर्थः पादः

12 38. D. 7.

तन्त्रवार्त्तिकटीका अजिता— परितोषमिश्रकृता

Paper. 437 Foll. 8 × 6 inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing. Bound in 2 Volumes.

A commentary on Kumārila's Tantravārttika by Paritoṣamis'ra. The commen-

tary is called Ajitā with the descriptive term Tantraṭikānibandhana. The author is mentioned with the title Mahopādhyāya. As Paritoṣamisra is quoted by Paramesvara III in his Mīmāṁsāsūtrārthasaṁgraha, he must belong to the period about 1250 A.D. The following stanza found at the end of a MS. of the work available in the curator's office Library, Trivandrum, reveals the fact that the work is called Ajitā because it was written by the author who lived on the banks of the river called Ājitā. Viz :

" अजितातटमधिवसता तज्जलसेवाविधूतपापेन ।
यस्मादियमारचिता तस्मादजितैव नाम्नास्तु ॥ "

(No. 421. Vol. III of the Descriptive Catalogue of Sanskrit MSS. in the curator's office Library, Trivandrum, 1939.)

Contains the adhyāyas 1 and 2.

Beginning :

सिद्धप्रमाणभावस्य धर्मे वेदस्य सर्वशः ।
विध्यर्थवादमन्त्राणामुपयोगोऽधुनोच्यते ॥

इति वृत्तवर्तिष्यमाणकथनेनार्थवादादिविचारस्य संगतिमाह । का पुनरसौ । ननु चोदनाप्रामाण्यं प्रतिज्ञातं प्रसाधितं च सर्वप्रकारम् । तत्प्रामाण्यप्रतिज्ञयैवेतरेषामप्रामाण्यमाविष्कृतम् । तेनानभ्युपगताप्रस्तुतार्थवादादिप्रामाण्यस्याक्षेपो न प्रमाणलक्षणविषयत्वेन परिगृहीतमर्थं दूषयति समाधानं वा न समादधाति । तस्मादसंगतिरिति ।

End :

उपसंहरति—तस्मात्तदेवेति मतेरिति । एवमाशङ्कितानां भेदकारणानामभावादप्रतिपक्षायास्तदेवेति प्रत्यभिज्ञानमतेः न कर्म प्रतिशाखं भिद्यत इति सिद्धम् । अनेन चानुसृतभेदकारणाप्रतिपत्त्या भेदाभावनिर्णयेन न सप्तममपरं कारणमस्तीति प्रतिपादनात् यथोक्तैव शब्दान्तरादिप्रमाणषट्कावधिर्भेदसिद्धिः । नापराप्याशङ्कनीया । संपूर्णमभिहितं भेदलक्षणमिति ।

Colophon :

इति महोपाध्यायश्रीपरितोषमिश्रविरचिते तन्त्रटीकानिबन्धने अजिताख्याने द्वितीयाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

13 38. D. 3.

अजिताव्याख्या विजया—अनन्तनारायणमिश्रकृता

Paper. 494 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$. inches. 14 lines in a page. Devanāgarī script. New Good. Good writing.

This is a commentary on Paritoṣamisra's Ajitā, by Anantanārāyaṇamisra son of Sūryaviṣṇumisra. The commentary is called Vijayā. The author was popularly known as the Ajitācārya. Paramesvara III in his Mīmāṁsāsūtrārthasaṁgraha refers to the author Anantanārāyaṇa as Vijayakāra. The work may be assigned to the period about 1400 A.D.

Contains upto the 1st pāda of the 2nd Adhyāya.

Beginning :

ओंकारसंज्ञं सर्वज्ञं सर्वकल्याणसंश्रयम् ।
सर्वाधिगम्यं चैतन्य(माश्रये) परमं महः ॥
अथ बुद्धिमतां कृतेऽजितां
परितोषार्यकृतां जिगीषताम् ।
विजयाख्यमिदं विधास्यते
निपुणग्राह्यगुणं निबन्धनम् ॥

अत्र सिद्धप्रमाणभावस्येत्यादिवार्त्तिकस्य वृत्त-वर्तिष्यमाणकथनरूपस्य तावन्मात्रपर्यवसानं मन्दप्रयो-जनत्वादयुक्तं मन्यमानः संगतिपरतामाह—वृत्तेति। यद्यपि वर्तिष्यमाणकथने विधेः प्रथममुपादानात् विध्यादिविचारस्येति वक्तव्यम्, तथापि विधेरनुप-योगशङ्काभावेन साक्षाद्विचाराभावमभिप्रेत्यार्थवादादि-विचारस्येत्युक्तम्।

End :

Colophon :

इति श्रीमहोपाध्यायाजिताचार्यापरनामधेयस्यानन्त-नारायणस्य कृतावजितानिबन्धने विजयाख्ये द्वितीय-स्याध्यायस्य प्रथमः पादः समाप्तः।

* * *

End :

उभयसामान्यज्ञातपूर्वापरीभावश्चेति व्यापारो भाव-नेति . .

14. 34. D. 2.

अजिताव्याख्या विजया—अनन्तनारायणमिश्रकृता

Palm-leaf. 154 Foll. 18 × 1½ inches. 10 lines in a page. Malayālam script. Old. Injured. Good writing. Leaves are in disorder.

Contains portions of the 1st and 3rd adhyāyas.

Beginning :

अत्रापि द्रष्टव्यमित्यपृथक्प्रयत्नादरादाह—तथेति। एवंच यद्यन्नकरणत्वं शूर्पे त्वेकार्थसमवायीत्यर्थः संपद्यत इति यथावस्थितान्वये दोषं दर्शयन्नाह—न शूर्पस्येति।

End :

नन्वग्निष्टोमसंस्थैव क्रत्वर्था। उक्थ्यादिसंस्था तु पुरुषार्थेति कथं ज्योतिष्टोमविकारेषूक्थ्यादीनामति-देशः शङ्कितुमपि शक्यः। अत आह—येषां सर्वसंस्थमिति।

Colophon :

इत्यनन्तनारायणस्य कृतौ अजिताव्याख्याने विजयाख्याने तृतीयस्याध्यायस्य षष्ठः पादः।

15 28. E. 19.

तन्त्रवार्त्तिकटीका न्यायसुधा—सोमेश्वरभट्टकृता

Palm leaf. 203 Foll. 15 × 1⅜ inches. 9 lines in a page. Telugu script. Old. Much injured. Good writing. The leaves are partly worm-eaten and broken.

This is a good commentary on Kumārila-bhaṭṭa's Tantravārttika dealing with the portion from the 2nd pāda of the 1st adhyāya to the end of the 3rd adhyāya of the Pūrvamīmāṁsā sūtras. The author Bhaṭṭa Someśvara was the son of Bhaṭṭa Mādhava who is mentioned with the title of Trikāṇḍa-mīmāṁsā-maṇḍana. The commentary is called Nyāyasudhā or Rāṇaka. At the end of the 4th pāda of the 3rd adhyāya the author himself calls the commentary with another title Sarvānavadyaṁkaraṇī. The author may be fixed in the middle of the 14th century A.D.

Wants a few lines in the beginning and breaks off in the 24th sūtra of the fourth pāda of the 1st adhyāya.

Beginning :

उमानन्दनमाराध्य शारदामीश्वरं गुरुम्।
कृत्स्नशास्त्रप्रसादेन व्याख्यास्ये तन्त्रवार्त्तिकम्॥
आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्।

End :

यदि तु न कश्चित् सर्वाङ्गोपसंहारसमर्थः स्यात् ततः कतिपयाङ्गोपसंहारेणाप्यधिकारः कल्प्येत । न त्वेतदस्तीत्याह—सन्ति चेति । अतः प्रयोगविधेः संकोचं विनानुपपत्त्यभावान्न शक्यमात्राङ्गविषयतया संकोचकल्पना युक्तेत्युपसंहरति ।

16 20. M. 33.

तन्त्रवार्त्तिकव्याख्या न्यायसुधा—सोमेश्वरभट्टकृता

Palm leaf. 69 Foll. $17\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script.. Old. Injured. Good writing.

Contains the 4th pāda of the 1st adhyāya.

Reads the following stanza at the end.

व्याख्याता तन्त्रटीका बहुभिरपि भृशं प्रायशोऽन्यैर्निबन्धै-
रुत्सृष्टा ये त्वबोधाद्यमनुविदधानैस्तु दुर्बोधतत्त्वाः ।
ग्रन्थाः सारार्थभावा अपि बहुतरा व्याकृतेष्वप्यमीषु
स्पष्टं कार्त्स्न्येन बोधो न हि भवति भृशं प्रायशोऽन्यैर्निबन्धैः ॥

तस्मात्सर्वान्निबन्धान् परमपि चतुःप . . . .

17 30. A. 15.

तन्त्रवार्त्तिकटीका न्यायसुधा—सोमेश्वरभट्टकृता

Palm leaf. 200 Foll. $17\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Begins in the 8th sūtra of the 1st pāda of the 2nd adhyāya and goes on up to the end of the same adhyāya.

18 8. K. 1[12]

तन्त्रवार्त्तिकटीका न्यायसुधा—सोमेश्वरभट्टकृता

Paper. 155 Foll. (Pages marked 5039 to 5348). $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good writing.

Bound Volume.

Contains the pādas 7th complete and 8th incomplete of the 3rd adhyāya.

19 40. B. 6.

तन्त्रवार्त्तिकटीका न्यायसुधा—सोमेश्वरभट्टकृता

Paper. 99 Foll. 11×5 inches. 13 lines in a page. Devanāgarī script, Old. Good. Good writing.

Fol. 91 is wanting.

Contains the sūtras 1 to 17 of the 3rd pāda of the 1st adhyāya.

Reads the following colophon.

इति श्रीस्मृतिचरणन्यायसुधापूर्वार्धं समाप्तम् ।

The scribe adds :

अमरकाश्यां विश्वेश्वरराजधान्यां संवत् 1589 समये ज्येष्ठवदी एकादशी बुधवासरे । श्रीमत्काश्याम् ।

20 40. C. 25.

तन्त्रवार्त्तिकटीका न्यायसुधा—सोमेश्वरभट्टकृता

Paper. 125 Foll. 11×5 inches. 14 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Contains the 4th pāda of the 3rd adhyāya.

The scribe adds :

मीमांसकनरहरिणा निवीतचरणे शोधितानि न्यायसुधापत्राणि स्वपठनकाले । ग्रन्थाः 5100.

The MS. does not read the verses found at the end in the printed edition.

21 8. K. 1 $\frac{1 \text{ to } 6}{\cdot}$

न्यायसुधाव्याख्या राणकोज्जीवनी—अन्नंभट्टकृता

Paper. 1370 Foll. $8\frac{3}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 6 vols. (1 to 6)

This is a commentary on Someśvarabhaṭṭa's Nyāyasudhā or Rāṇaka by Annambhaṭṭa son of Tirumalācārya who belonged to the family of Rāghavasomayājin and bore the titles of Advaitavidyācārya and Mahopādhyāya. The colophons call the commentary by different names as Rāṇakojjivanī, Sudhāsāra and Subodhinī. Annambhaṭṭa may be assigned to the latter part of the 17th century A.D. He was a versatile author and wrote works in almost all śāstras. He wrote also a direct commentary on the Tantravārttika.

Contains the adhyāyas 1 and 2 complete.

Beginning :

शिवयो: शाश्वतैकत्वं तनोतु शुभसंततिम् ।
निदर्शयितुमद्वैतं भजतामिव संगतम् ॥
वाणीं गुरुं गणेशं च प्रणम्य तदनुग्रहात् ।
व्याख्यास्ये फक्किकां गूढां राणकस्य क्वचित्क्वचित् ॥

कृत्स्नशस्तत्प्रसादेनेति। गुरुप्रसादेन, उमानन्दनादिप्रकान्तसर्वप्रसादेन वा । कृत्स्नश: साकल्येन । सूत्रभाष्यसमेतं वार्त्तिकमिति यावत् । स्थापितत्वादिति। तथा च पौनरुक्त्यमेका शङ्का । तदतिरिक्तानां भावनाप्रतिपादकातिरिक्तानाम् । आदिना मन्त्रनामधेयग्रहणम् । अत्र उदाहरणभाष्ये । उदाहियेरन्निति अनुदाहरणात् न्यूनतेति द्वितीया शङ्का ।

Colophons :

इति श्रीमदद्वैतविद्याचार्यमहोपाध्यायराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यसूनो: अन्नंभट्टस्य कृतौ राणकोज्जीवन्यां प्रथमस्याध्यायस्य द्वितीय: पाद: ।

इति श्रीमत्तिरुमलाचार्यवर्यसूनो: अन्नंभट्टस्य कृतौ राणकोज्जीवन्यां सुबोधिन्यां प्रथमस्याध्यायस्य तृतीय: पाद: ।

End :

पुनरुक्ति: स्यादेवेति शङ्कते—ननु तेष्विति । आचमनादिस्मृतीनां भ्रमादिकारणान्तराभावात् श्रुतिमूलत्वमेवेति आचमनादीन्यनुष्ठेयान्येव । कर्मादीनां पदार्थाङ्गत्वेन तद्विरोधित्वाभावादिति सूत्रार्थ: ।

Colophon :

इति श्रीमदद्वैतविद्याचार्यमहोपाध्यायराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य सूनो: अन्नंभट्टस्य कृतौ राणकोज्जीवन्यां सुधासाराख्यायां द्वितीयाध्याध्यायस्य चतुर्थ: पाद: ।

22 30. C. 14.

न्यायसुधाव्याख्या राणकोज्जीवनी—अन्नंभट्टकृता

Palm leaf. 256 Foll. $16\frac{1}{2} \times 1\frac{3}{8}$ inches 8 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Wants one leaf in the beginning of the 1st pāda of the 3rd adhyāya and goes on up to the end of the 3rd pāda of the same adhyāya.

23 8 K. 1 7 to 11

तन्त्रवार्त्तिकटीका सुबोधिनी—अन्नंभट्टकृता

Paper 1150 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New good. Good writing.

Bound in 5 Vols. (7 to 11).

This is a direct commentary on Kumārila's Tantravārttika by Annambhaṭṭa son of Tirumalācarya of Rāghavasomayājin's family of Āndhades'a.

Contains the pādas 1 to 7 (except 5) of the 3rd adhyaya.

Beginning:

विश्वेशं हृदि संततं निधाय वाणी-
मादित्यं गणपतिमादरादुपास्य ।
मीमांसागुरुमपरं च विश्वनाथं
व्याख्यास्ये विबुधमुदे तृतीयतन्त्रम् ॥
सुधाचिते . . . संकल्प्य लिख्यतेऽविस्तरं यथा ।
शक्त्यनुवा . . . सतां संतोषदो यतः ॥
अथातः शेषलक्षणम् ।

शेषशब्दस्याङ्गत्वप्रतिपादकत्वादग्रिमसूत्रे तन्मात्रपरत्वाच्च अङ्गत्वप्रतिज्ञामात्रपरत्वात् अङ्गत्वप्रतिज्ञामात्रपरत्वेनावभासमानं सूत्रं विशिष्टलक्षणार्थप्रतिज्ञापरत्वेन व्याचष्टे—द्विलक्षण्या इति । सूत्रे शेषशब्दोऽवशिष्टपरः । आद्यसूत्रप्रतिज्ञातेषु धर्मस्वरूपप्रमाणादिषु लक्षणद्वये स्वरूपप्रमाणनिरूपणपर्यवसाने द्वादशलक्षणीप्रतिपाद्यमवशिष्टमङ्गत्वप्रतिपादनं क्रियत इति सामान्यप्रतिज्ञासूत्रार्थः ।

End:

यद्वा साक्षात्समाख्यया कर्तृनियमसंभवात् प्रधानद्वारत्वस्यानुग्रहाननुग्रहे च विरोधाभावादिति योजना । यद्वा साक्षात्समाख्यया अस्मिन् पक्षेऽनुग्रहेऽपीत्यभ्युपगममात्रम् । अव्यक्ताः शेष इति अवयवार्थमुपसंहरति—तेनेति । येन चोदको बलवांस्तेनेत्यर्थः ।

Colophon:

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यश्रीराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यसूनोः अन्नंभट्टस्य कृतौ तत्ववार्त्तिकटीकायां तृतीयस्याध्यायस्य सप्तमः पादः ।

24 40. C. 26.

तन्त्ववार्त्तिकव्याख्यानम् न्यायपारायणम्—गङ्गाधरमिश्रकृतम्

Paper. 41 Foll. 11½ × 5¼ inches. 16 lines in a page. Devanāgarī script. Old. Slightly injured. Clear writing.

This is another commentary on Kumārilabhaṭṭa's Tantravārttika by Gaṅgādharamis'ra son of Somes'varabhaṭṭa of S'ālmaligrāma. The commentary is known by the name Nyāyaparāyaṇa *alias* Tantravārttikavivaraṇa. Probably the author's father Bhaṭṭa Somes'vara may be identical with the author of the Nyāyasudhā *alias* Rāṇaka. The work may be assigned to 1350 A.D. approximately.

Contains the pādas 5 and 6 in the 3rd adhyāya.

Beginning:

आज्याच्च सर्वसंयोगात् ।

दर्शपूर्णमासौ प्रकृत्य शेषात् स्विष्टकृते समवद्यतीत्यादि शेषकार्यमाम्नातम् । तच्च प्रकरणसाधारण्यात् सर्वेषामेवाग्नेयादिप्रधानद्रव्यशेषाणां कर्तव्यमिति पूर्वत्राधिकरणे व्यवस्थापितम् । इदमिदानीमालोच्यते—किमुपांशुयाजेऽपि कर्तव्यम्, उत नेति ।

End:

प्रयोजनान्तरमाह—तथेदमिति ।

सोमोऽग्निष्टोमसंस्थोऽपि नोक्थ्यादिवदुपाधितः ।
स्वभावतस्तु तन्नित्यो नित्यधर्मान् प्रतीच्छति ॥
शाल्मलिग्रामसंभूतो भट्टसोमेश्वरात्मजः ।
गङ्गाधरोऽतिगम्भीरं व्यवृणोत्तन्त्रवार्त्तिकम् ॥

Colophon:

इति श्रीमहोपाध्यायगङ्गाधरमिश्रकृतौ तन्त्रवार्तिकविवरणे न्यायपारायणे तृतीयस्याध्यायस्य षष्ठः पादः ॥

The scribe adds:

राजमिश्रेण लिखितम् । संवत् १६४१ ज्येष्ठवदि ६ सोमे । ग्रन्थाः २२००. श्रीरवि· शरणम् ।

25 34. D. 2.

तन्त्रवार्त्तिकव्याख्यानम् न्यायपारायणम्—गङ्गाधरमिश्रकृतम्

Palm leaf. 16 Foll. 18 × 1½ inches. 10 lines in a page. Malayālam script. Old. Injured. Good writing.

The leaves are in disorder. Wooden [illegible]ards are added to both sides.

C[illegible]tains a small portion of the 3rd [illegible]a.

[illegible]:

[illegible]यध्यायार्थं सुखग्रहणाय संक्षिप्योपसंहरति—[illegible]थित[illegible]ावलप्रपञ्चैरिति । मुख्यत्वेन पुरोडाश-एव[illegible] लक्षणा । वेदे कल्पिता ह्येषा सवनीये [illegible]यते

शा[illegible]ग्रामसंभूतभट्टसोमेश्वरात्मजः ।
ग[illegible]ऽतिगम्भीरं व्यवृणोत्तन्त्रवार्त्तिकम् ॥

Colophon:

इति श्रीमहोपाध्यायगङ्गाधरमिश्रकृतौ तन्त्रवार्त्तिकविवरणे न्यायपारायणे तृतीयस्याध्यायस्याष्टमः पादः समाप्तः । समाप्तश्चाध्यायः । समाप्तं न्यायपारायणम् ।

The scribe adds:

तामेतामजिताव्याख्यां पादौ पारायणस्य च ।
कात्स्न्र्येन पक्षिराजोऽस्मिन्मुनीशप्रीतयेऽलिखत् ॥
कारिकायां सहस्राणि त्रीणि त्रीणि शतानि च ।
अष्टादश सहस्राणि विना चम्पौ चतुःशतैः ।
ग्रन्थाः पञ्च सहस्राणि गद्ये चत्रैं चतुःशतैः ।
संभूय पञ्चशत्यूनषड्विंशतिसहस्रकम् ।
वार्त्तिकामृतमास्वाद्यं विबुधत्वाप्तये बुधैः ॥

Then four blank leaves are added.

26 39. C. 12.

टुप्टीकाव्याख्यानम् तन्त्ररत्नम्—पार्थसारथिमिश्रकृतम्

Paper. 1387 Foll. 8¾ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 8 volumes. Vols. 1 to 4 bear the pagination 1 to 1384 and Vols. 5 to 8 bear 1 to 1390. Total number of pages 2774.

This is an elaborate commentary on the Ṭupṭīkā of Kumārilabhaṭṭa dealing with the adhyāyas 4 to 12 of the Pūrvamīmāṁsasūtras. The author Pārthasārathimis'ra was the son and pupil of Yajñātman: His other works are, the S'āstradīpikā, Nyāyaratnākara, and Nyāyaratnamāla. He occupies a prominent place among the famous authors on Mīmāṁsā

works. He may be placed in the latter half of the 11th century A.D.

Contains the adhyāyas 4 to 12 complete.

Beginning:

अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ।

पूर्वाध्याये शेषपर्यायमैदमर्थ्यमेव चिन्तितम् । इहापि क्रतुषु ऐदमर्थ्यमेव चिन्त्यत इति न लक्षणभेदः स्यादत आह—तृतीयेनाध्यायेनावधृते शेषत्वे कः क्रत्वर्थः ? कः पुरुषार्थ इति चिन्त्यत इति संबन्धः । एतदेव विवृणोति—विशेषश्चिन्त्यते पूर्वमवधृते सामान्ये । यथा सप्तमेन सामान्यातिदेशे सिद्धे अष्टमेन विशेषातिदेशश्चिन्त्यते, एवमिहापि सामान्यविशेषविषयत्वेन लक्षणभेदः । तदिदमेकदेशिमतं निराकरोति—अथवेति ।

End:

तथा भारतेऽपि— . . .

. . . याजकयाज्येषु यथा दत्तं हविर्नशेत् ।

इति । हविषो विनाशवचनात् क्रतुवैगुण्यमेव दर्शितम् । लिङ्गदर्शनानि च, 'ब्राह्मणानामिदं हविः' इत्येवमादीनि ।

आर्त्विज्यं न भवेत्कर्म स्वतः क्षत्रियवैश्ययोः ।
ब्राह्मणानां च विदुषामार्त्विज्यं स्यादिति स्थितम् ॥

Colophon:

इति श्रीउपाध्यायपार्थसारथिमिश्रविरचिते तन्त्ररत्ने द्वादशाध्यायस्य चतुर्थः पादः समाप्तः । अध्यायश्च समाप्तः ।

27 10. I. 4.

डुप्टीकाव्याख्यानम् तन्त्ररत्नम्—पार्थसारथिमिश्रकृतम्

Paper. 519 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 3 Volumes. Each volume contains separate pagination. 1st Vol. 1 to 342, 2nd 1 to 226 and 3rd 1 to 470.

Contains the adhyāyas 4 to 6 (but wants a few lines in the beginning of the 4th adhyāya) and breaks off in the 8th pāda of the 6th adhyāya.

This is a transcript made from the original MS. available in the Mahārāja's Palace Library, Tanjore.

28 40. B. 5.

डुप्टीकाव्याख्यानम् तन्त्ररत्नम्—पार्थसारथिमिश्रकृतम्

Paper. 638 Foll. $10\frac{1}{2} \times 4$ and $11 \times 4\frac{1}{2}$ inches. 9 and 13 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

The MS. is a collection of 9 bundles each containing certain specific portions as mentioned below:

I	contains the	4th	adhyāya in	173	Foll.
II	,,	5th	,,	68	,,
III	,,	6th	,,	69	,,
IV	,,	7th	,,	35	,,
V	,,	8th	,,	15	,,
VI	,,	9th	,,	97	,,
VII	,,	10th	,,	73	,,
VIII	,,	11th	,,	40	,,
IX	,,	11th, 12th	,,	68	,,

29 40. C. 20.

डुप्टीकाव्याख्यानम् तन्त्ररत्नम्—पार्थसारथिमिश्रकृतम्

Paper. 71 Foll. $11\frac{1}{8} \times 5$ inches. 9

lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the 5th adhyāya only breaking off in the last pāda.

Three extra Foll. added in the beginning read a small portion of the 5th adhyāya in duplicate.

30 10. I. 3.

टुप्टीकाव्याख्यानम् वार्त्तिकाभरणम्—वेंकटेश्वरदीक्षितकृतम्

Paper. 390 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing. Bound in 2 volumes.

This is another commentary on Kumārilabhaṭṭa's Ṭupṭīka. The commentator Veṅkaṭeśvaradīkṣita was the son of the famous Govindadīkṣita, the minister of the Nāyaka Kings of Tanjore in the latter part of the 16th century A.D. He refers himself as the younger brother and pupil of Yajñanārāyaṇadīkṣita. Rājacūḍāmaṇidīkṣita and Nīlakaṇṭhadīkṣita were two disciples of Veṅkaṭeśvaradīkṣita.

Contains the adhyāyas 8 and 10th the latter breaking off in the 8th pāda.

Beginning :

अथ विशेषलक्षणम् ।

इह खलु भगवानाचार्यः सप्तमेनाष्टमस्य संगतेः स्पष्टत्वात् तामनभिधायात्र भाष्यकारेण—एवं तावत्सप्तमेनाध्यायेन सामान्यतोऽतिदेशलक्षणमुक्तम् । अविहितधर्मकेष्वैन्द्राग्नादिषु विहितधर्मकेभ्यो दर्शपूर्णमासादिभ्यो धर्मा अतिदिश्यन्त इति वृत्तं संकीर्त्य, तत्र चिन्ता भवति किमेकस्मिन् कर्मणि सर्वकर्मसु धर्मातिदेशः, उतैकस्मादिति संशयोपन्यासः कृतः । तमाक्षेप्तुं तद्भाष्यग्रन्थं प्रतीकतोऽनुवदति । किमेकस्मिन्निति ।

* * *

Colophon :

इति श्रीमदद्वैतविद्याचार्यसाग्निचित्यसर्वतोमुखातिरात्रसाग्निचित्याप्तवाजपेययाजिश्रीगोविन्ददीक्षितवरनन्दस्य साग्निचित्यसर्वपृष्ठाप्तोर्यामयाजिश्रीयज्ञनारायणदीक्षितानुजस्य तच्छिष्यतालब्धसमस्तविद्यावैशद्यस्य साग्निचित्याप्तवाजपेययाजिश्रीवेंकटेश्वरदीक्षितस्य कृतिषु टुप्टीकाव्याख्याने वार्त्तिकाभरणे अष्टमस्याध्यायस्य प्रथमः पादः ।

End :

न चाग्नीषोमावाज्यस्येति वचनेनाग्नीषोमदेवताकोपांशुयाग एव पौर्णमासीकाले विधीयते, न सर्वत्रेति वाच्यम्; अग्नीषोमग्रहणस्योपलक्षणत्वेनोपांशुयाजमात्र एव तद्विधानात् । अन्यथानुवाददोषप्रसङ्गात् । तस्मान्मन्त्रवर्णाद्विष्णुः प्रजापतिरग्नीषोमौ च देवताः । आहत्य विधिबलात् पौर्णमास्येव कालविधिरिति सिद्धान्तः ।

It is said that this is a transcript made from the original MS. available in the Mahārājā's Palace Library, Tanjore.

31 38. D. 4.

टुप्टीकाव्याख्यानम् वार्त्तिकाभरणम्—वेंकटेश्वरदीक्षितकृतम्

Paper. 684 Foll. $8\frac{3}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Grantha script. New. Good. Good writing. Bound in 4 volumes.

Contains the adhyāyas 9 and 10, the former containing the pādas 1 to 3 only and the latter breaking off in the 8th pāda.

32 38. B. 6.

मीमांसासूत्रभाष्यव्याख्या बृहती—प्रभाकरमिश्रकृता

Paper. 605 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 4 volumes. The first volume contains pages 1 to 437 and 3 extra pages marked as 437 *a*, *b* and *c*, the second 438 to 660, the third 661 to 950 and the fourth 951 to 1210. The extra pages of the first volume read a few lines from the beginning of the 2nd adhyāya in duplicate.

Bṛhatī is a well-known commentary on S'abarasvāmin's Mīmāṁsāsūtrabhāṣya by Prabhākaramis'ra. With a view against to the Bhāṭṭamata he was the propagandist of his school of Mīmāṁsā philosophy. Tradition says that the author was first a disciple of Kumārilabhaṭṭa and then began to propagate against him in respect of certain principles. Another version reveals that he belonged to ante-Kumārila period and was maintaining the orthodox views of the Mīmāṁsā school of philosophy. He is popularly known as Guru and his school as Gurumata. He is known to have written 2 commentaries on the S'ābarabhāṣya, the Laghvī *alias* Vivaraṇa and the Bṛhatī *alias* Nibandhaṇa. According to the former version of the tradition he must have been a contemporary of Kumārila and therefore his time should be 650 to 720 A.D. while according to the latter it should be before 620 A.D.

Contains up to the end of the 2nd pāda of the 6th adhyāya.

Beginning :

अथातो धर्मजिज्ञासेति । लोक इत्यादिभाष्यस्य अथात इत्येतस्मिन् पदद्वयस्यालौकिकार्थाशङ्कानिवृत्तिः प्रयोजनम । कुत एतत् ? स्वाध्यायाध्ययनविधेरविवक्षितार्थत्वनिराकरणात् । कथं पुनरविवक्षाशङ्का ? स्वाध्यायाध्ययनविधेरधिकाराश्रवणात् आचार्यकरणविधिप्रयोज्यत्वाच्च । कथं पुनरन्यस्य विधेरन्येन प्रयुक्तिः ?

End :

अथवायं मन्त्रार्थात् ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन समगातराणां वाक्ये ब्राह्मणादश्रवणात् ब्राह्मणस्यैवैतानि कर्माणीति पूर्वपक्षवादी मन्यते । अपि विदोषे नाधिकारावगमात् नार्थवादस्य चान्यार्थत्वादर्थाधिकारव्याख्या युक्ता । नैतद्दशेनाधिकारः ।

Colophon :

इति श्रीप्रभाकरमिश्रविरचितायां शाबरभाष्यव्याख्यायां बृहत्यां षष्ठेऽध्याये द्वितीयः पादः समाप्तः।

The copying of the MS. was completed on 25-9-1922. Page 437 reads the following lines :

श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीनां प्रभाकरमीमांसायां प्रथमोऽध्यायः ।

The Tarkapāda alone has been printed and published in Chowkhāmbā Sanskrit Series, Benares, No. 391 in 1929, and Madras University Sanskrit Series, No. 3 in 1934.

33 38. C. 23.

बृहतीव्याख्या ऋजुविमला—शालिकनाथमिश्रकृता

Paper. 1162 Foll. $8\frac{3}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from the Original MS. available in the Govt. Oriental MSS. Library, Madras.

Bound in 7 volumes. The first volume contains pages 1 to 380, the second 381 to 718, the third 1 to 240, the fourth 1 to 240, the fifth 1 to 227, the sixth 1 to 386 and the seventh 1 to 512.

This is the famous commentary on Prabhākara's Bṛhatī by S'ālikanāthamis'ra who has been mentioned with the title Mahāmahopādhyāya. He is traditionally known to have been a direct disciple of Prabhākara the author of the Bṛhatī. Besides this, there are three works written by S'ālikanātha, namely—the Dīpas'ikhā (a commentary on Prabhakara's Laghvī), the Prakaraṇapañcikā and the Mīmāṁsā-bhāṣyaparis'iṣṭa. S'ālikanātha may be assigned to the beginning of the 8th century A.D. The commentary is called pañcikā or Ṛjuvimalā-pañcikā.

Contains the adhyāyas 1 to 6 complete except the 2nd pāda of the 1st adyāya and 1 and 2 pādas of the 3rd adyāya.

Beginning :

सृष्टाज्ञाननिशाध्वंसिनिबन्धमयवासरम् ।
उज्जासितजगज्जाडयं नमस्यामः प्रभाकरम् ॥
प्रभाकरमयीं दृष्टिं दक्षिणां दधतं सदा ।
वामदर्शनतापन्नचन्द्रं वन्देऽपराजितम् ॥
प्रभाकरगुरोर्भावं मितगम्भीरभाषिणो ।
अञ्जसा व्यञ्जयिष्यन्ती पञ्चिका क्रियते मया ॥
अपन्यासनिरासाभ्यां व्यासेनैषा विदूषिता ।
व्याख्या प्राचां निबन्धॄणामिति नाहमदूदुषम् ॥

लोक इत्यादिभाष्यं यत्नगौरवं प्रसज्येतेत्येवमन्तमथशब्ददूषणार्थमौचित्यानुभाषणपरमिति वार्त्तिककारेण व्याख्यातम । तत्तु मन्दप्रयोजनमिति मत्वा टीकाकारः प्रयोजनं दर्शयति—लोक इत्यादिभाष्यस्येत्यादिना ।

Colophon :

इति श्रीशालिकनाथमिश्रकृतायामृजुविमलायां पञ्चिकायां प्रथमस्याध्यायस्य प्रथमः पादः ।

End :

न च सामान्यविशेषेऽवस्थाप्यमानं शब्दार्थतां जहाति । यद्यपि विनियोगेन विरोधः । तथापि तस्य कार्यानुगुण्यात विशेषावस्थितिरेव न्याय्या । अनुष्ठानानुगुणोऽभिविनियोगः । अनुष्ठानार्थत्वात् । अनुष्ठानं च मन्त्रान्वितमिति तद्वशेन विशेषावस्थापनमेव न्याय्यम् । न च संभवन्त्यां यौगिकत्वं संभवतीत्युक्तम् । तस्मात्सुष्ठूच्यते छागो वा मन्त्रवर्णादिति । शेषमुक्तम् ।

Colophon :

इति पञ्चिकायां षष्ठाध्यायेऽष्टमः पादः समाप्तः ।

34 21. P. 14.

बृहतीव्याख्या ऋजुविमला—शालिकनाथमिश्रकृता

Palm leaf. 130 Foll. $16\frac{3}{4} \times 2$ inches. 8 lines in a page. Malayālam script. Old. Injured. Good writing.

Contains the Tarkapāda only without beginning.

35 21. P. 15.

बृहतीव्याख्या ऋजुविमला—शालिकनाथमिश्रकृता

Palm leaf. 171 Foll. 23¾ × 2 inches. 8 lines in a page. Malayālam script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Begins in the 3rd adhyāya and breaks off in the 1st pāda of the 6th adhyāya.

36 39. G. 1.

बृहतीव्याख्या ऋजुविमला—शालिकनाथमिश्रकृता

Paper. 149 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from the original MS. available in the Bhandarkar Oriental Research Institute, Poona in 1929.

Contains Pādas 1 and 2 complete and 3 incomplete of the 9th adhyāya.

Beginning :

यज्ञकर्म । विशिष्टकार्यावगम्यत्वादूहस्य विशेषातिदेशलक्षणं हेतुः । अस्यार्थः—विकृतौ प्राकृतानां पदार्थानामतिदेशेन प्राप्तौ सत्यां प्राकृतात्कार्याद्विशिष्टं कार्यमवगम्यते । तत्प्रमाणकश्चोहः । तेन भवति विशेषातिदेश ऊहहेतुः ।

Colophon :

इति श्रीमहामहोपाध्यायश्रीशालिकनाथमिश्रकृतौ ऋजुविमलाख्यायां पञ्चिकायां नवमाध्यायस्य प्रथमः पादः ।

End :

राद्धान्तमाह । क्लृप्त एवाधिकारे दोषश्रवणात् अर्थवादाभिहितो दोषः पुरुषार्थत्व आञ्जस्येनोपपद्यते । युक्त्यन्तरं चाह—इष्टशब्दसंयोग ।

37 39. G. 2.

बृहतीव्याख्या ऋजुविमला—शालिकनाथमिश्रकृता

Paper. 161 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from the original MS. available in the Bhandarkar Oriental Research Institute, Poona in 1929.

Contains pādas 1 to 3 complete and 4 incomplete of the 10 adhyāya.

Beginning :

विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् । ननु च बाधे सत्यूहेन भवितव्यम् । अनेन भाष्योक्तमूहबाधलक्षणे हेतुहेतुमद्भावमाक्षिपति । यदि ह्यूहे सति बाधः स्यात् तर्हि ऊहस्य बाधं प्रति हेतुता स्यात् । विपरीतं तु विद्यते ।

Colophon :

इति श्रीशालिकनाथमिश्रविरचितायामृजुविमलाख्यायां पञ्चिकायां दशमस्य प्रथमः पादः ।

End :

ननु च भाष्यकारेण साम्नां निवृत्तिरित्युक्तम्, न स्तुत्यन्तरेण स्तुतीनां निवृत्तिरित्युक्तम् । अतो भाष्यविरोधः । उत्तरम् । फलतस्तद्व ।

38 54. A. 32.

लघ्वीव्याख्या दीपशिखा—शालिकनाथमिश्रकृता

Paper. 474 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 2 vols.

Dīpaśikhā is a commentary on the

Laghvī which itself is a commentary on S'abarasvāmin's Pūrvamīmāṁsāsūtrabhāṣya by Prabhākaramis'ra. It is said that Prabhākaramis'ra wrote two commentaries on S'abarasvāmin's Mīmāṁsāsūtrabhāṣya by the names Bṛhatī and Laghvī. These two works are also called as Nibandhana and Vivaraṇa respectively. S'ālikanāthamis'ra as the devoted disciple of Prabhākaramis'ra wrote two commentarias one on the Bṛhatī and the other on the Laghvī. The commentary on the former is called Ṛjuvimalā while on the latter Dīpas'ikhā. S'ālikanāthamis'ra may be assigned to the beginning of the 8th century A.D. The work is very rare. The MS. under description is a transcript made from a MS. lent by Dr. C. Kunhan Raja.

Contains the adhyāyas 7 to 12 with numerous omissions in the 7th adhyāya. The last 24 pages give the portion of the 9th adhyāya to be read in continuation of the page 249 of the Vol. I.

Beginning of the 1st volume:

ओम् । श्रुतिप्रमाणपूर्वत्वात् । पूर्वेणाध्यायषट्केण प्रत्यक्षविहितधर्माणां दर्शपूर्णमासादीनां .... केषुचिदैन्द्राग्नादिषु चिन्तियितुमिष्यत इत्यनेन भाष्येणेदमुच्यते । पूर्वस्मिन् षट्के योऽर्थो निर्णीतस्तस्मिन् सत्युत्तरस्यार्थ .... बध्यस्य कथनार्थमिदमधिकरणमिति । ननु चाद्यषट्कशेषभूतमिदमधिकरणं लक्ष्यते, उपदेशार्थचिन्तनात् ।

Colophon:

इति दीपशिखायां सप्तमस्य प्रथमः पादः ।

End of the 1st volume:

ननु हविष्प्रकृतिभूततण्डुलसाधनद्रव्यसंस्कारोऽवघातस्य प्रकृतौ कार्यम् । तदिह विकृतौ न संभवति । यवानां हविर्भूतसाधनसाधनत्वात् । यद्यत्रापि सक्तवो हविर्भवेयुः स्यात्प्राकृतकार्यम् । न च तदस्ति । उच्यते—हविर्गततुषकणविमोकोऽवघातस्य कार्यम् । आश्रयमात्रं तु व्रीह्यादिस्वरूपम् । अत्र च यद्यपि यवा न श्रुताः, तथापि अवघाताक्षेपेणैवोपादीयन्ते । अवघातश्च कार्यसंभवात् कर्तव्य एव ।

Colophon:

इति दीपशिखायां दशमस्य द्वितीयः पादः ।

Beginning of the second volume:

विकृतौ । नन्वत्र कर्मविधाने प्रकृतिलिङ्गसंयोगभावान्न प्राकृतीतिकर्तव्याता निवर्तते । किमिदमुच्यते न प्राकृतीतिकर्तव्यता निवर्तत इति । यद्यप्येकादश प्रयाजान् यजतीति कर्मान्तरविधानं तथापि प्राकृतकार्ये विधानमिति नास्ति प्रमाणम् । यथा तैलस्य घृतकार्यविधाने अदृष्टार्थत्वाद्यागान्तरविधानस्य विधीयमानस्य । ततश्च प्राकृतप्रयाजाद्यनिवृत्तेः किमिदमुच्यते प्राकृतीतिकर्तव्यता निवर्तत इति ।

Colophon:

इति दीपशिखायां दशमस्य तृतीयः पादः ।

End of the second volume:

अधिकारनियमे च ब्राह्मणादीनां याजनादिप्रवृत्तौ सत्यां क्रतावपि कार्यस्यार्त्विज्यस्याविकृतत्वात् क्षत्रियवैश्ययोरप्रवृत्तिः, ऋत्विक्त्वाभावादिति युक्तम् । न पुनस्तादर्थ्ये क्रत्वर्थत्वं क्षत्रियवैश्ययोर्विहन्यते, क्रतौ वर्णनियमाभावात् । तस्मादत्रापि प्रसङ्ग इति सिद्धम् । एवंच दर्शनान्यपि सिद्धानि ।

Colophon :

इति विवरणपञ्चिकायां दीपशिखायां द्वादशस्याध्यायस्य चतुर्थः पादः ।

39 38. C. 17.

मीमांसासूत्रभाष्यपरिशिष्टम्—शालिकनाथमिश्रकृतम्

Paper. 43 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from the orginal MS. available in the Gvt. Oriental MSS. Library, Madras.

This is a supplement to the Prabhākar's Bṛhatī commenting on certain passages of the S'ābarabhāṣya left without commenting by Prabhākara in his Bṛhatī. The author is S'ālikanāthamis'ra, the author of the Ṛjuvimalā.

Beginning :

हरते सर्वविघ्नानि कर्मसिद्धिविधायिने ।
तुभ्यमभ्यासवत्येषा महागणपते नतिः ॥
प्रभाकरेण गुरुणा व्याख्यातार्थस्य भूयसः ।
मीमांसाभाष्यजातस्य परिशिष्टं विभज्यते ॥

अथातो धर्मजिज्ञासा ।

अध्ययनविधेराचार्यकरणविधिसिद्धमात्रप्रयोजनत्वेनाविवक्षितार्थतया स्वाध्यायाध्ययनस्य न वेदाध्ययनानन्तरा तद्धेतुका वेदार्थजिज्ञासावकल्पत इति न लौकिकार्थतया अथात इति पदद्वयमवकल्पत इति पारिभाषिकोऽस्यार्थ आश्रयणीयः, लौकिकार्थाश्रयणे वार्थान्तरमध्याहृत्य लक्षणां गुणकल्पनां वाश्रित्य वर्णना न्याय्येत्याशङ्क्याह । वृद्धव्यवहारे

End :

स्तुतयो ह्येता न सत्रस्य यथाक्रमार्था येनानुपपन्नाः स्युः । तत एतां स्तुतिं दर्शयति—वनस्पत .... मेति । स्तुतौ दृष्टान्तमाह—यथेति । अविविक्तेन हेतुना .... र्थे कथमाशङ्का । तस्मादिति परमप्रकृतमुपसंहरति ...... ।

Colophon :

इदं शालिकनाथेन भाष्यतत्त्वार्थवेदिना ।
परिशिष्टार्थबोधाय परिशिष्टं प्रवर्तितम् ॥
प्रथमाध्यायस्य प्रथमः पादः समाप्तः ।

The scribe adds on page 49 :

गणनेऽक्षरचञ्चूनामभितिष्ठन् कनिष्ठिकाम् ।
नारायणो लिखितवान् परिशिष्टं महाग्रहात् ॥

The two verses mentioned above have been copied in the middle of the MS. The work has been printed and published in the Madras University Sanskrit Series, No. 3. part II in the year 1936.

40 38. B. 4.

मीमांसासूत्रभाष्यव्याख्या ग्रन्थयोजना

Paper. 40 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

The MS. contains also the Bhāvanāviveka and its commentary.

A commentary on S'abarasvāmin's, Mīmāṁsāsūtrabhāṣya. The commentary is called Granthayojanā. The commentor's name is not known.

Contains the Tarkapāda only breaking off in the 5th Sūtra.

Beginning :

नमामि तां मणिस्थूणां नरकेसरिमातरम् ।
स्तन्यं यत्प्रसवस्यासन्दैत्येन्द्ररुधिरच्छटाः ॥
भाष्यस्य शाबरस्येयमाचार्योक्तेन वर्त्मना ।
सुधियां सुग्रहत्वाय क्रियते ग्रन्थयोजना ॥

अथातो धर्मजिज्ञासा । इत्याद्यमिदं शास्त्रस्य विषयीभूतधर्मप्रयोजनादिप्रतिपादनद्वारेणारम्भणीयतां दर्शयितुं सूत्रम् । तत्राथशब्दं प्रसिद्धार्थस्यासंभवादाक्षिपन् सर्वत्र प्रसिद्धार्थग्रहणस्यैव तावत्कर्तव्यतामाह—लोक इति ।

End :

परिहरति—उच्यत इति । भवेदप्येवं यदि तस्मिन् कल्पि . . . . न त्वेवं तदकल्पने प्रथमभाविनः स्फुटप्रत्ययस्य चरमभाविनः . . . . अत उभयवादिसिद्धाः संस्कारा एव कल्पनीयाः । . . . . प्रतिपत्तिरित्याह—तस्मादिति । इति स्फोटवादः ।

41 38. B. 5.

मीमांसासूत्रभाष्यविवरणम्—गोविन्दामृतमुनिकृतम्

Paper. 462 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

A commentary on S'abarasvāmin's Mīmāṁsāsūtrabhāṣya by Govindāmṛtamuni disciple of Nārāyaṇāmṛta. The author is also called as Devendrasarasvatī.

Contains from the 2nd pāda of the 1st adhyāya to the 2nd pāda (incomplete) of the 2nd adhyāya.

Beginning :

यस्मादाविरभूद्विश्वं यत्र च प्रविलीयते ।
तत्स्वतः सच्चिदानन्दं नमस्यामः परं महः ॥
